# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-१) (New)** | **प्रश्नपत्रम् – 4** | गुणाः –70 |
| विषयः – साहित्यम् (अलङ्कारवर्गः) | **कोड –C.C.4.1.3** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – कुवलयानन्दः | |

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोलिखितयोः एकस्मिन् विषये व्याख्यां लिखत।** ५

१ उपमा यत्र सादृश्य लक्ष्मीरुल्लसति द्वयोः।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते॥

२ स्यात् स्मृतिभ्रान्तिसन्देहैस्तदङ्कालङ्कृतित्रयम्।
पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः॥

**प्रश्न २ अधोलिखितालङ्कारयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ रूपकालङ्कारः

२ उत्प्रेक्षालङ्कारः

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोलिखितयोरेकस्य व्याख्यां लिखत।** ५

१ वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना।
यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता॥

२ निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते।
विधे ! सनिन्द्यो यस्ते प्रागेकमेवाहरच्छिरः॥

**प्रश्न ४ अधोलिखितालङ्कारयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ समासोक्त्यलङ्कारः

२ श्लेषालङ्कारः

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितयोः एकस्मिन् विषये व्याख्यां कुरुत।** ५

१ विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसङ्गतिः।
विषं जलधरैः पीतं, मूर्च्छिता पथिकाङ्गनाः॥

२ विचित्रं तत्प्रयन्तश्चेद्विपरीतः फलेच्छया।
नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम्॥

**प्रश्न ६ अधोलिखितालङ्कारयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ विभावनालङ्कारः

२ विषमालङ्कारः

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ अधोलिखितयोः कस्याप्येकस्य व्याख्यां कुरुत।** ५

१ यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः।
शत्रुं मित्रं विपत्तिं च जय रञ्जय भञ्जय॥

२ प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः।
जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामघः कृतौ॥

**प्रश्न ८ अधोलिखितालङ्कारयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ पर्यायालङ्कारः

२ समुच्चयालङ्कारः

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ अनन्वयालङ्कारः कदा भवति?

२ उत्प्रेक्षालङ्कारस्य उदाहरणं लिखत।

३ “पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः” – अत्र कोऽलङ्कारः?

४ तुल्ययोगितालङ्कारस्य लक्षणं लिखन्तु।

५ दीपकालङ्कारः कदा भवति?

६ प्रतिवस्तूपमालङ्कारस्य लक्षणं लिखत।

७ व्यतिरेकालङ्कारस्य उदाहरणं लिखन्तु।

८ “नमस्तस्मै कृतौ येन मुधा राहुवधूकुचौ” - अत्र कोऽलङ्कारः?

९ आक्षेपालङ्कारः कदा भवति?

१० विशेषोक्त्यालङ्कारः कुत्र भवति?

११ अधिकारालङ्कारस्य उदाहरणं लिखन्तु।

१२ व्याघातालङ्कारस्य लक्षणं लिखत।

१३ एकावल्यङ्कारः कदा भवति?

१४ “उत्कण्ठिता च तरूणी जगामास्तं च भानुमान्” – अत्र कोऽलङ्कारः?

१५ काव्यलिङ्गालङ्कारस्य उदाहरणं लिखन्तु।